श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनिवासरामानुजमहादेशिकैः (मैसूर आण्डवन्)
संस्कृतभाषायां अनुवाद्य अनुगृहीतं
श्रीमद्वेदान्ताचार्यविरचितम्

# ॥ अडैक्कलप्पत्तु ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अडैक्कलप्पत्तु ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

भक्त्यादावनवाप्तसुस्थितिरटन् सर्वत्र धावन् यथा
श्रान्तस्सन् पतितो रघूत्तमपदे काकस्तथा सप्तसु।
मुक्तिप्राप्तिकरीषु पूर्षु महिते काञ्चीपुरे दीव्यतः
हस्तीशस्य कृपैकलक्ष्यमधुना भूत्वा तमाशिश्रिये ॥ 1 ॥

कपर्दिचतुराननप्रभृतयः स्वकर्मानुगाः
भवन्ति चलवैभवा इति विलोक्य पद्माजुषः।
गजाचलमहेशितुः प्रथितकाञ्चिपूर्वासिनः
दयाब्धिवरदप्रभोः शरणमेमि पादद्वयम् ॥ 2 ॥

तन्त्रैरन्यैर्विना स्वस्वसरणिमविनाश्यैव मन्त्रैस्तथोक्तैः
वैलक्षण्यं च सूक्तैः सुविशदमवलोक्यैव पादौ नमन्ति।
कारुण्योद्वर्षिणोऽस्मास्वखिलतनुयुतेष्वस्य देवाधिनेतुः
हस्तिक्षोणीधराधीश्वरवरदविभोः शीलतोऽन्यन्न जाने ॥ 3 ॥

काकक्रव्यादपाण्ड्वात्मजनृपरमणीक्षत्रबन्धुद्विपेन्द्र -
स्थाणुब्रह्मादिबृन्दारकपुरनिलयेभ्यस्सुखेष्वग्र्यभाजम्।
मोक्षं चानन्दपूर्णं ददतमिह दयां प्रेक्ष्य पूर्णां तदीयां
नागागाधीशदेवाधिपवरदपदाम्भोजयुग्मं प्रपद्ये ॥ 4 ॥

श्रीशोल्लासक्रिया या विदधदतिमुदा सञ्जिहानोऽनभीष्टाः
सम्बन्धौघं गुणौघं समधिकमनुभूयैव विश्वासकाष्ठाम्।
श्रेष्ठां संप्रार्थ्य रक्षां जगति गतिधुतो नैव चक्रे तपोऽहं
काञ्च्यां सालावृतायां वरदमुरुदयं रक्षितारं प्रपद्ये॥ **5**॥

प्राज्ञा ये शरणं गता अनुययुर्ये वा तदुक्त्या दृढं
ये वैतादृशतारकोक्तिदकृपामेवैत्य चेरुस्तपः।
चौर्यस्याकरणात् स्वका इम इति प्रीत्याङ्ग्यकुर्वंश्च ये
तेषां गोप्तरि मां दयाळुवरदे न्यस्ये तुलस्यद्वहे॥ **6**॥

भवत्पदयुगं श्रये त्विति सकृत्प्रवक्तृनलं
प्रतीत इति बोधयन्निव करं प्रदर्श्याभयम्।
वितीर्य सकलं स्वकं स्वयमतीव यो राजते
दयाळुवरदप्रभोः पदयुगं च तस्याश्रये॥ **7**॥

विश्वासान्यूनतायै उपचितफलपूर्त्यै च दुष्कर्मलब्धां
सत्यांशाविस्मृतिं तां निरसयितुमवाप्तोपलब्धौ प्रतुष्ट्यै।
शैतल्याहीनतायै विधरणकरणार्थं प्रशान्त्यै दयाळोः
सौन्दर्योपासिमूर्तेः करिगिरिकमितुः किं गिरो विस्मरामि॥ **8**॥

क्षणे च निगमार्थवित्सुमनसां विशुद्धोक्तिभिः
शुभारविधियां च तास्सुकलयन् गुरूणां गिरः।
विनाश्य धिषणासिना विशयमात्मनः प्राणमं
रवीन्दुनयनस्य तत्पदयुगं गजाद्रीशितुः॥ **9**॥

लक्ष्म्यां दिव्याकृतौ तन्निरवधिकरुणानिर्मलज्ञानयोश्च
संसाध्ये स्वानुबन्धे त्वमितजनपदैश्वर्यपूर्णे प्रणाशे।
रक्षायां सर्गकार्येऽप्यनुदितकलुषाकाररीत्या स्थितस्य
सुस्थे लक्ष्ये विलग्नश्शर इव वरदस्यानुकम्पावतोऽहम्॥ **10**॥

उपायोऽन्यो न स्यात् फलमपि रमेशादिति विदां
    प्रपत्तिस्सर्वेषां फलमपि तदीयं सकृदिमे।
कदाचिद्द्वोपायः फलमिति च मत्वैव पदयोः
    कृपाळोः प्रोक्तं सद्गुणिदशकमेतद्विकलुषम् ॥ **11** ॥

श्रीदेशिकप्रबन्धस्थप्रपत्तिदशकस्य हि।
गोपालार्यो लिलेखार्थतात्पर्ये श्लोकसंयुते ॥ **12** ॥

॥ इति अडैक्कलप्पत्तु प्रबन्धः समाप्तः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥